With Humble Pranams

To

Sri U.Ve. Mukkur Lakshmi Narasimhachariyar Swamy

Taittirīya-Saṃhitā

Edited by Vijayaraghavan Bashyam

Book 1, Chapter 7

कृष्ण यजुर्वेदीया तैत्तिरीय संहिता,

प्रथमं काण्डम्, सप्तमः प्रपाठकः

याजमान ब्राह्मणम्

[[1-7-1]]

इडानुमन्त्रणमन्त्रब्राह्मणम्॥ प्रजापतिर्ऋषिः।

[[1-7-1-1]]

पा॒क॒य॒ज्ञं वा अ॒न्वाहि॑ताग्नेः प॒शव॒ उप॑ तिष्ठन्त॒ इडा॒ खलु॒ वै पा॑कय॒ज्ञः

स्यैषा ऽन्त॒रा प्र॑याजानूया॒जान्यज॑मानस्य लो॒के ऽव॑हिता॒। ता᳚माँह्रि॒यमा॑णाम॒भि म॑न्त्रयेत॒

सु॑रूपवर्षवर्ण॒ एही॑ति॒ प॒शवो॒ वा इडा॑ प॒शूने॒वोप॑ ह्वयते। य॒ज्ञं वै दे॒वा अदु॑ह्रन्य॒ज्ञो ऽसु॑राꣳ अदुह॒त्

ते ऽसु॑रा य॒ज्ञदु॑ग्धाः॒ परा॑ऽभव॒न्यो वै य॒ज्ञस्य॒ दोहं॑ विद्वान्॥

[[1-7-1-2]]

यज॒ते ऽप्य॒न्यं यज॑मानं दु॒हे। सा मे॑ स॒त्याऽऽशीर॒स्य य॒ज्ञस्य॑ भूया॒दित्या॑है॒ष वै य॒ज्ञस्य॒ दोह॒ः

तेनै॒वैनं॑ दु॒हे। प्रत्ता॒ वै गौर्दु॑हे॒ प्रत्तेडा॒ यज॑मानाय दुह ए॒ते वा इडा॑यै॒ स्तना॒ इडोप॑हू॒तेति॑ वा॒यु॒र्व॒त्सो। यर्हि॒ होतेडा॑मुप॒ह्वये॑त॒

तर्हि॒ यज॑माना॒ो होता॑र॒मीक्ष॑माणो वा॒युम् मन॑सा ध्यायेत्॥

[[1-7-1-3]]

मा॒त्रे व॒त्समुपाव॑सृज॒ति॒। सर्वे॑ण॒ वै य॒ज्ञेन॑ दे॒वाः सु॑व॒र्गं लो॒कमा॑यन्

पाकय॒ज्ञेन॒ मनु॑रश्राम्य॒त्सेडा॒ मनु॑मु॒पाव॑र्तत॒ तां दे॑वासु॒रा व्य॑ह्वयन्त प्र॒तीचीं॑ दे॒वाः परा॑ची॒ं असु॑रा॒स्सा दे॒वानु॒पाव॑र्तत प॒शवो॒

वै तद्दे॒वा न॑वृणत प॒शवो ऽसु॑रानजहु॒ः। यं का॒मये॑ताप॒शुः स्या॒दि॒ति॒ परा॑ची॒ं तस्ये॒डामुप॑ ह्वयेताप॒शुरे॒व भ॑वति॒

यम्॥

[[1-7-1-4]]

का॒मये॑त पशु॒मान्त्स्या॒दिति॑ प्र॒तीची॒ं तस्येडा॒मुप॑ ह्वयेत पशु॒मा॒नेव भ॑वति। ब्रह्मवा॒दिनो॑ वद॒न्ति॒

स त्वा इडा॒ं उप॑ ह्वये॒त य इडा॑ं उप॒हूया॒ऽऽत्मान॒मिडा॑या॒मुप ह्व॒येतेति॒। सा नः॑ प्रि॒या

सु॒प्रतू᳚र्ति॒र्म॑घोनीत्या॒हेडा॑मे॒वोप॒हूया॒ऽऽत्मान॒मिडा॑या॒मुप॑ ह्वयते॒। व्य॑स्तमि॒व वा ए॒तद्य॒ज्ञस्य॒ यदिडा॑ सा॒मि प्रा॒श्नन्ति॑॥

[[1-7-1-5]]

सा॒मि मा᳚र्जयन्त ए॒तत् प्रति॒ वा असु॑राणां य॒ज्ञो व्य॑च्छिद्यत॒

ब्रह्म॑णा दे॒वाः सम॑दधु॒र्। बृ॒हस्पति॑स्तनुतामि॒मं न॒ इत्या॑ह॒ ब्रह्म॒ वै दे॒वानां॒ बृ॒हस्पति॒र्ब्रह्म॑णै॒व य॒ज्ञꣳ सं द॑धाति॒। विच्छि॑न्नं य॒ज्ञꣳ समि॒मं द॑धा॒त्वित्या॑ह॒

संत॑त्यै॒व। विश्वे॑ दे॒वा इ॒ह मा॑दयन्ता॒मित्या॑ह सं॒तत्यै॒व य॒ज्ञं दे॒वेभ्यो ऽनु॑ दिशति॒। यां वै॥

[[1-7-1-6]]

य॒ज्ञे दक्षि॑णां॒ ददा॑ति ताम॑स्य प॒शवो ऽनु॒ सं क्रा॑मन्ति॒

स ए॒ष ई॑जा॒नो ऽप॒शुर्भावु॑को॒ यज॑मानेन॒ खलु॒ वै तत्का॒र्य॑मित्या॑हु॒र्यथा॑ दे॒वत्रा॑ द॒त्तं कु॒र्वी॒ताऽऽत्मन्॒ प॒शून्॒ र॒मये॒तेति॒। ब्रध्न॒ पिन्व॒स्वेत्या॑ह

य॒ज्ञो वै ब्र॒ध्नो य॒ज्ञमे॒व तन्म॑हय॒त्यथो॑ दे॒वत्रै॒व द॒त्तं कु॑रुत आ॒त्मन्॒ प॒शून्॒ र॑मयते॒। दद॑तो मे॒

[[1-7-1-7]]

मा क्षा॒यीत्या॒हाक्षि॑तिमे॒वोपै॑ति। कु॒र्व॒तो मे॒ मोप॑ दस॒दित्या॑ह

भू॒मान॑मे॒वोपै॑ति॥

[[1-7-2]]

सꣳश्रव-स्तुमिञ्जयोः प्रश्नोत्तराभ्यामिडप्रशंसनम्॥ प्रजापतिर्ऋषिः।

[[1-7-2-1]]

सꣳश्र॑वा ह सौवर्च॑न॒सस्तुमि॑ञ्ज॒मौपो॑दितिमुवा॒च

यत्स॒त्त्रिणा॒ꣳ होताऽभूः कामिडा॒मुपा॑ह्वथा॒ इति॒

तामुपा॑ह्व॒ इति॑ होवा॒च या प्रा॒णेन॑ दे॒वान्द॒धार॑ व्याने॒न॑ मनु॒ष्या॑नपा॒नेन॑ पि॒तॄनिति॑

छि॒नत्ति॒ सा न छि॑न॒त्ती३ इति॑

छि॒नत्तीति॑ होवा॒च

शरी॑रं॒ वा अ॑स्यै॒ तदुपा॑ह्वथा॒ इति॑ होवा॒च

गौर्वै॑॥

[[1-7-2-2]]

अ॒स्यै॒ शरी॑रम्॒।

गां वाव तौ तत्पर्य॑वदता॒म्।

या य॒ज्ञे दी॒यते॒ सा प्रा॒णेन॑ दे॒वान्॒ दा॑धार॒ यया॑ मनु॒ष्या॑ जीव॑न्ति सा व्या॒नेन॑ मनु॒ष्या॑न्यां पि॒तृभ्यो॒ घ्नन्ति॒ साऽपा॒नेन॑ पि॒तॄन्॒

य ए॒वं वेद॑ पशु॒मान्॒ भ॑वति।

अथ॒ वै तामुपा॑ह्व॒ इति॑ होवा॒च या प्र॒जाः प्रभव॑न्ती॒ः प्रत्या॒भवतीति।

अन्नं॒ वा अ॑स्यै॒ तत्॒॥

[[1-7-2-3]]

उपा॑ह्वथा॒ इति॑ होवा॒च।

ओष॑धयो॒ वा अ॒स्या अन्न॑म्

ओ॑षधयो॒ वै प्र॒जाः प्र॒भव॑न्ती॒ः प्रत्या भ॑वन्ति॒

य ए॒वं वेदा॑न्ना॒दो भ॑व॒ति।

अथ॒ वै तामुपा॑ह्व॒ इति॑ होवाच॒ या प्र॒जाः प॑रा॒भव॑न्तीरनु॒गृ॒ह्णाति॒ प्रत्या॒भव॑न्तीर्गृ॒ह्णातीति॑

प्रति॒ष्ठां वा अ॒स्यै तदुपा॑ह्वथा॒ इति॑ होवाच॒।

इयं वा अ॒स्यै प्रति॒ष्ठा॥

[[1-7-2-4]]

इ॒यं वै प्र॒जाः प॑रा॒भव॑न्ती॒रनु॑ गृ॒ह्णाति॒ प्रत्या॒भव॑न्तीर्गृ॒ह्णाति॒

य ए॒वं वेद॒ प्रत्ये॒व ति॑ष्ठ॒ति।

अथ॒ वै तामुपा॑ह्व॒ इति॑ होवाच॒ यस्यै॑ नि॒क्रम॑णे घृ॒तं प्र॒जाः सं॒जीव॑न्ती॒ः पि॒बन्तीति॑

छि॒नत्ति॒ सा न छि॑न॒त्ती३ इ॒ति

न छि॑न॒त्तीति॑ होवाच॒ प्र तु ज॑नय॒तीति।

ए॒ष वा इडा॒मुपा॑ह्वथा॒ इति॑

[[1-7-2-5]]

होवाच॒

वृ॒ष्टिर्वा इडा॒

वृ॒ष्ट्यै वै नि॒क्रम॑णे घृ॒तं प्र॒जाः सं॒जीव॑न्तीः पिबन्ति॒

य ए॒वं वेद॒ प्रैव जा॑यते ऽन्ना॒दो भ॑वति॥

[[1-7-3]]

अन्वहार्यः॥ प्रजापतिर्ऋषिः।

[[1-7-3-1]]

प॒रोऽक्षं॒ वा अ॒न्ये दे॒वा इ॒ज्यन्ते॑ प्र॒त्यक्ष॑म॒न्ये

यद्यज॑ते॒ य ए॒व दे॒वाः प॒रोक्ष॑मि॒ज्यन्ते॒ ताने॒व तद्य॑जति॒

यद॑न्वाहा॒र्य॑माह॑र॒त्येते वै दे॒वाः प्र॒त्यक्षं॒ यद्ब्रा॑ह्म॒णास्ताने॒व तेन॑ प्रीणा॒ति।

अथो॒ दक्षि॑णै॒वास्यै॒षा।

अथो॑ य॒ज्ञस्यै॒व छि॒द्रमपि॑ दधाति॒

यद्वै य॒ज्ञस्य॑ क्रू॒रं यद्वि॒लि॑ष्टं॒ तद॑न्वाहा॒र्ये॑ण॥

[[1-7-3-2]]

अ॒न्वाह॑रति॒

तद॑न्वाहा॒र्य॑स्यान्वाहा॒र्य॑त्वम्।

दे॑वदू॒ता वा ए॒ते यदृ॒त्विजः॑।

यद॑न्वाहा॒र्य᳚मा॒हर॑ति देवदू॒ताने॒व प्री॑णाति

प्र॒जाप॑तिर्दे॒वेभ्यो॑ य॒ज्ञान्व्या॑दि॒शत्

स रि॑रिचा॒नो॑ ऽमन्यत॒

स ए॒तम॑न्वाहा॒र्य᳚मभ॑क्तमपश्य॒त्

तमा॒त्मन्न॑धत्त॒

स वा ए॒ष प्रा॑जाप॒त्यो यद॑न्वाहा॒र्यः॑।

यस्यै॒वं वि॒दुषो᳚ ऽन्वाहा॒र्य॑ आह्रि॒यते॑ सा॒क्षादे॒व प्र॒जाप॑तिमृध्नो॒ति।

अप॑रिमितो नि॒रुप्यः॑।

अप॑रिमितः प्र॒जाप॑तिः।

प्र॒जाप॑ते॒ः॥
[[1-7-3-3]]
आप्त्यै॑

दे॒वा वै यद्य॒ज्ञे ऽकु॑र्वत॒ तदसु॑रा अकुर्वत॒

ते दे॒वा ए॒तं प्रा॑जाप॒त्यम॑न्वाहा॒र्य᳚मपश्यन्॒

तम॒न्वाह॑रन्त॒

ततो॑ दे॒वा अभ॑वन् पराऽसु॑रा॒ः।

यस्यै॒वं वि॒दुषो᳚ ऽन्वाहा॒र्य॑ आह्रि॒यते॒ भव॑त्या॒त्मना॒ परा᳚ऽस्य॒ भ्रातृ॑व्यो भवति

य॒ज्ञेन॒ वा इ॒ष्टी प॒क्वेन॑ पू॒र्ती

यस्यै॒वं वि॒दुषो᳚ ऽन्वाहा॒र्य॑ आह्रि॒यते॒ स त्वे॑वेष्टा॑पू॒र्ती

प्र॒जाप॑तेर्भा॒गो॑ ऽसि॥
[[1-7-3-4]]
इ॒त्या॑ह

प्र॒जाप॑तिमे॒व भा॑ग॒धेये॑न॒ सम॑र्धय॒ति।

ऊर्ज॑स्वा॒न् पय॑स्वा॒नित्या॒ह।

ऊर्ज॑मे॒वास्मि॒न् पयो॑ दधाति

प्राणापा॒नौ मे॑ पाहि समानव्या॒नौ मे॑ पा॒हीत्या॑ह।

आ॒शिष॑मे॒वैतामा शा॒स्ते।

अक्षितो ऽस्यक्षित्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मिँल्लोक इत्याह

क्षीयते वा अमुष्मिँल्लोके ऽन्नम्

इतः प्रदानङ्ँ ह्यमुष्मिँल्लोके प्रजा उपजीवन्ति

यदेवमभिमृशत्यक्षितिमेवैनद्गमयति नास्यामुष्मिँल्लोके ऽन्नं क्षीयते॥
[[1-7-4]]

शेषाहुतीनामनुमन्त्रणमन्त्रव्याख्यानम्॥ प्रजापतिर्ऋषिः।
[[1-7-4-1]]

बर्हिषो ऽहं देवयज्यया प्रजावान् भूयासमित्याह

बर्हिषा वै प्रजापतिः प्रजा असृजत

तेनैव प्रजाः सृजते

नराशꣳसस्याहं देवयज्यया पशुमान्भूयासमित्याह

नराशꣳसेन वै प्रजापतिः पशूनसृजत

तेनैव पशून्त्सृजते।

अग्नेः स्विष्टकृतो ऽहं देवयज्ययाऽऽयुष्मान् यज्ञेन प्रतिष्ठां गमेयमित्याह।

आयुरेवाऽऽत्मन् धत्ते प्रति यज्ञेन तिष्ठति

दर्शपूर्णमासयोः॥
[[1-7-4-2]]

वै देवा उज्जितिमनूदजयन् दर्शपूर्णमासाभ्यामसुरानपानुदन्त।

अग्नेरहमुज्जितिमनूज्जेषमित्याह

दर्शपूर्णमासयोरेव देवतानां यजमान उज्जितिमनूज्जयति दर्शपूर्णमासाभ्यां भ्रातृव्यानप नुदते

वाजवतीभ्यां व्यूहति।

अन्नं वै वाजः।

अन्नमेवाव रुन्द्धे

द्वाभ्यां प्रतिष्ठित्यै

यो वै यज्ञस्य द्वौ दोहौ विद्वान् यजत उभयतः॥
[[1-7-4-3]]

एव यज्ञं दुहे पुरस्ताच्चोपरिष्टाच्चैष वा अन्यो यज्ञस्य दोह इडायामन्यः।

यर्हि होता यजमानस्य नाम गृह्णीयात् तर्हि ब्रूयात्।

एमा अग्मन्नाशिषो दोहकामा इति

सङ्स्तुता एव देवता दुहे।

अथो उभयत एव यज्ञं दुहे पुरस्ताच्चोपरिष्टाच्च

रोहितेन त्वाऽग्निर्देवताङ्गमयत्वित्याह।

एते वै देवाश्वाः॥
[[1-7-4-4]]

यजमानः प्रस्तरः।

यदेतैः प्रस्तरं प्रहरति देवाश्वैरेव यजमानꣳ सुवर्गं लोकं गमयति

वि ते मुञ्चामि रशना वि रश्मीनित्याह।

एष वा अग्नेर्विमोकस्

तेनैवैनं वि मुञ्चति

विष्णोः शंयोरहं देवयज्यया यज्ञेन प्रतिष्ठां गमेयमित्याह

यज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रति तिष्ठति

सोमस्याहं देवयज्यया सुरेताः॥
[[1-7-4-5]]

रेतो धिषीयेत्याह

सोमो वै रेतोधास्तेनैव रेत आत्मन् धत्ते

त्वष्टुरहं देवयज्यया पशूनाꣳ रूपं पुषेयमित्याह

त्वष्टा वै पशूनाम् मिथुनानाꣳ रूपकृत्

तेनैव पशूनाꣳ रूपमात्मन् धत्ते

देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयासमित्याह।

एतस्माद्वै मिथुनात् प्रजापतिर्मिथुनेन॥
[[1-7-4-6]]

प्राजायत

तस्मादेव यजमानो मिथुनेन प्र जायते

वेदोऽसि वित्तिरसि विदेयेत्याह

वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दन्त

तद्वेदस्य वेदत्वम्।

यद्यद्भ्रातृव्यस्याभिध्यायेत् तस्य नाम गृह्णीयात्

तदेवास्य सर्वं वृङ्क्ते

घृतवन्तं कुलायिनꣳ रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनमित्याह

प्र सहस्रं पशूनाँप्नोति।

आस्य प्रजायाँव्वाजी जायते य एवं वेद॥

[[1-7-5]]

आप्यायनादिमन्त्रव्याख्यानम्॥ प्रजापतिर्ऋषिः

[[1-7-5-1]]

ध्रुवां वै रिच्यमानां यज्ञो ऽनु रिच्यते यज्ञं यजमानो यजमानं प्रजाः।

ध्रुवामाप्यायमानां यज्ञो ऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजाः।

आ प्यायतां ध्रुवा घृतेनेत्याह

ध्रुवामेवाऽऽ प्याययति

तामाप्यायमानां यज्ञो ऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजाः

प्रजापतेर्विभान्नाम लोकस्तस्मिꣳस्त्वा दधामि सह यजमानेन॥

इति

[[1-7-5-2]]

आह।

अयं वै प्रजापतेर्विभान्नाम लोकः

तस्मिन्नेवैनं दधाति सह यजमानेन

रिच्यत इव वा एतद्यद्यजते

यद्यजमानभागं प्राश्नात्यात्मानमेव प्रीणाति।

एतावान्वै यज्ञो यावान्यजमानभागः।

यज्ञो यजमानः।

यद्यजमान भागं प्राश्नाति यज्ञ एव यज्ञं प्रति ष्ठापयति।

एतद्वै सूयवसꣳ सोदकं यद्बर्हिश्चाऽऽपश्च।

एतत्॥

[[1-7-5-3]]

यजमानस्याऽऽयतनं यद्वेदिः।

यत्पूँर्णपात्रमन्तर्वेदि निनयति स्व एवाऽऽयतने सूयवसꣳ सोदकं कुरुते

सदसि सन्मे भूया इत्याह।

आपो वै यज्ञः।

आपो ऽमृतम्।

यज्ञमेवामृतमात्मन् धत्ते

सर्वाणि वै भूतानि व्रतमुपयन्तमनूप यन्ति

प्राच्यान्दिशि देवा ऋत्विजो मार्जयन्तामित्याह।

एष वै दर्शपूर्णमासयोरवभृथः॥
[[1-7-5-4]]

यान्येवैनं भूतानि व्रतमुपयन्तमनूपयन्ति तैरेव सहावभृथमवैति

विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्

यद्विष्णुक्रमान्क्रमते विष्णुरेव भूत्वा यजमानः।

छन्दोभिरिमाँल्लोकाननपजय्यमभि जयति

विष्णोः क्रमो ऽस्यभिमातिहेत्याह

गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशः।

छन्दोभिरेवेमाँल्लोकान् यथापूर्वमभि जयति॥
[[1-7-6]]

उपस्थानादिमन्त्रव्याख्यानम्॥ प्रजापतिर्ऋषिः
[[1-7-6-1]]

अगन्म सुवः सुवरगन्मेत्याह सुवर्गमेव लोकमेति

संदृशस्ते मा छिंत्सि यत्ते तपस्तस्मै ते माऽऽ वृक्षीत्याह

यथायजुरेवैतत्

सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहीत्याह।

आशिषमेवैतामा शास्ते प्र वा एषो ऽस्माँल्लोकाच्च्यवते यः॥
[[1-7-6-2]]

विष्णुक्रमान् क्रमते सुवर्गाय हि लोकाय विष्णुक्रमाः क्रम्यन्ते

ब्रह्मवादिनो वदन्ति

स त्वै विष्णुक्रमान्क्रमेत य इमाँल्लोकान्भ्रातृव्यस्य संविद्य पुनरिमं लोकं प्रत्यवरोहेदिति।

एष वा अस्य लोकस्य प्रत्यवरोहो यदाह।

इदमहममुं भ्रातृव्यमाभ्यो दिग्भ्यो ऽस्यै दिव इति।

इमानेव लोकान् भ्रातृव्यस्य संविद्य पुनरिमं लोकं प्रत्यवरोहति

सम्॥
[[1-7-6-3]]

ज्योतिषाऽभूवमित्याह।

अस्मिन्नेव लोके प्रति तिष्ठति।

ऐन्द्रीमावृतमन्वावर्त इत्याह।

असौ वा आदित्य इन्द्रस्तस्यैवाऽऽवृतमनु पर्यावर्तते

दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्दक्षिणो ऽर्ध आत्मनो वीर्यावत्तरो ऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते

समहं प्रजया सं मया प्रजेत्याह।

आशिषम्॥
[[1-7-6-4]]
एवैतामा शास्ते

समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासमित्याह

यथायजुरेवैतत्।

वसुमान् यज्ञो वसीयान् भूयासमित्याह।

आशिषमेवैतामा शास्ते

बहु वै गार्हपत्यस्यान्ते मिश्रमिव चर्यत आग्निपावमानीभ्यां गार्हपत्यमुप तिष्ठते पुनात्येवाग्निं पुनीत आत्मानं द्वाभ्यां प्रतिष्ठित्यै।

अग्ने गृहपत इत्याह॥
[[1-7-6-5]]
यथायजुरेवैतच्छतꣳ हिमा इत्याह शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह

पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति

तामाशिषमा शासे तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो ऽजातः स्यात्तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते

तामाशिषमा शासे ऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रः॥
[[1-7-6-6]]
जातः स्यात्तेज एवास्मिन्ब्रह्मवर्चसं दधाति

यो वै यज्ञं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवति

कस्त्वा युनक्ति स त्वा वि मुञ्चत्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति प्रजापतिना वि मुञ्चति प्रतिष्ठित्यै।

ईश्वरं वै व्रतमविसृष्टं प्रदहो ऽग्ने व्रतपते व्रतमचारिषमित्याह व्रतमेव॥
[[1-7-6-7]]
वि सृजते शान्त्या अप्रदाहाय

पराङ्ङाव यज्ञ एति न नि वर्तते पुनर्यो वै यज्ञस्य पुनरालम्भं विद्वान् यजते तमभि नि वर्तते

यज्ञो बभूव स आ बभूवेत्याहैष वै यज्ञस्य पुनरालम्भस्तेनैवैनं पुनरा लभते।

अनवरुद्धा वा एतस्य विराड्य आहिताग्निः सन्नसभः पशवः खलु वै ब्राह्मणस्य सभा।

इष्ट्वा प्राङुत्क्रम्य ब्रूयाद्गोमाꣳ अग्ने ऽविमा ꣳ अश्वी यज्ञ इत्यव सभाꣳ रुन्द्धे प्र सहस्रं पशूनाप्नोत्याऽस्य प्रजायां वाजी

जायते॥

[[1-7-7]]

वाजपेयाध्यर्यवे रथ संस्काराः॥ सोमऋषिः

[[1-7-7-1]]

देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय दिव्यो गन्धर्वः

केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः।

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वयाऽयं वृत्रं वध्यात्।

वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे।

यस्यामिदं विश्वं भुवनमाविवेश तस्यान्नो देवः सविता धर्म साविषत्।

अप्सु॥

[[1-7-7-2]]

अन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवथ वाजिनः॥

वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविꣳशतिः।

ते अग्रे अश्वमायुञ्जन्ते अस्मिञ्जवमाऽदधुः॥

अपां नपादाशुहेमन् य ऊर्मिः ककुद्मान् प्रतूर्तिर्वाजसातमस्तेनायं वाजꣳ सेत्।

विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि।

अङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनु संचरन्तौ। दूरेहेतिरिन्द्रियावान्पतत्रि ते नो ऽग्नयः पप्रयः पारयन्तु॥

[[1-7-8]]

रथधावनम्॥ सोमऋषिः।

[[1-7-8-1]]

देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषम्।

देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳ रुहेयम्

इन्द्राय

वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयित्।

अश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्त्समत्सु वाजय।

अर्वाऽसि सप्तिरसि वाज्यसि

वाजि॑नो॒ वाज॑ं धावत म॒रुतां᳚ प्रस॒वे ज॑यत॒ वि योज॑ना मिमीध्व॒मध्व॑नः स्कभ्नीत॒॥
[[1-7-8-2]]

काष्ठां᳚ गच्छत॒

वाजे॑वाजे ऽवत वाजिनो नो॒ धने॑षु विप्रा अमृता ऋतज्ञा।

अ॒स्य मध्व॑ः पिबत मा॒दय॑ध्वं तृ॒प्ता या॑त प॒थिभि॑र्दे॒वयानैः᳚॥

ते नो॒ अर्व᳚न्तो हवन॒श्रुतो॒ ह॒वं विश्वे॑ शृण्वन्तु वा॒जिन॑ः।

मि॒तद्र॑वः

सहस्र॒सा मे॒धसा॑ता सनि॒ष्यव॑ः।

म॒हो ये रत्न॑ꣳ समि॒थेषु॑ जभ्रि॒रे शं नो॑ भवन्तु वा॒जिनो॒ हवे॑षु

दे॒वता॑ता मि॒तद्र॑वः स्व॒र्काः।

ज॒म्भय॒न्तो ऽहिं॒ वृक॑ꣳ॒ रक्षा॑ꣳसि॒ सने᳚म्य॒स्मद्यु॑यव॒न्न्॥
[[1-7-8-3]]

अमी॑वाः॥

ए॒ष स्य वा॒जी क्षि॑प॒णिं तु॑रण्यति ग्री॒वायां᳚ ब॒द्धो अ॑पिक॒क्ष आ॒सनि॑।

क्रतु॑ं दधि॒क्रा अनु॑ सं॒तवी᳚त्वत् प॒थामङ्का॒ꣳस्यन्वा॒पनी॑फणत्॥

उ॒त स्मा᳚स्य॒ द्रव॑तस्तुरण्य॒तः प॒र्णं न वेरनु॑ वाति प्रग॒र्धिन॑ः।

श्ये॒नस्ये॑व॒ ध्रज॑तो अङ्क॒सं परि॑ दधि॒क्राव्ण॑ः स॒होर्जा तरि॑त्रतः॥

आ मा॒ वाज॑स्य प्रस॒वो ज॑गम्या॒दा द्यावा॑पृथि॒वी वि॒श्वश॑ंभू।

आ मा॑ गन्तां पि॒तरा᳚॥
[[1-7-8-4]]

मा॒तरा॒ चाऽऽ मा॒ सोमो॑ अमृत॒त्वाय॑ गम्यात्॥

वाजि॑नो वाजजितो॒ वाज॑ꣳ सरि॒ष्यन्तो॒ वाज॑ं जे॒ष्यन्तो॒ बृह॒स्पते᳚र्भा॒गमव॑ जिघ्रत॒॥

वाजि॑नो वाजजितो॒ वाज॑ꣳ ससृ॒वाꣳसो॒ वाज॑ं जिगि॒वाꣳसो॒ बृह॒स्पते᳚र्भा॒गे नि मृ॑ड्ढ्वम्

इ॒यं व॒ः सा स॒त्या सं॒धाऽभू॒द्यामिन्द्रे॑ण स॒मध॑द्ध्वम्

अजी॑जिपत वनस्पतय॒ इन्द्र॑ं वा॒जं वि मु॑च्यध्वम्॥
[[1-7-9]]

यूपारोहणम्॥ सोमऋषिः।
[[1-7-9-1]]

क्ष॒त्रस्योल्ब॑मसि क्ष॒त्रस्य॒ योनि॑रसि॒

जाय॒ एहि॒ सुवो॒ रोहा॑व॒ रोहा॑व॒ हि सुव॑र॒हं ना॑वु॒भयो॒ः सुवो॑ रोक्ष्यामि॒

वाज॑श्च प्रस॒वश्चा॑पि॒जश्च॒ क्रतु॑श्च॒ सुव॑श्च मू॒र्धा च॒ व्य॑श्नि॒यश्चा᳚ऽऽन्त्याय॒नश्चान्त्य॑श्च भौव॒नश्च॒ भुव॑न॒श्चाधि॑पतिश्च।

आयु॑र्य॒ज्ञेन॑ कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पतामपा॒नः॥

[[1-7-9-2]]

य॒ज्ञेन॑ कल्पतां व्या॒नो य॒ज्ञेन॑ कल्पतां॒ चक्षु॑र्य॒ज्ञेन॑ कल्पता॒ꣳ॒ श्रोत्रं॑ य॒ज्ञेन॑ कल्पतां॒ मनो॑ य॒ज्ञेन॑ कल्पतां॒ वाग्य॒ज्ञेन॑

कल्पतामा॒त्मा य॒ज्ञेन॑ कल्पतां य॒ज्ञो य॒ज्ञेन॑ कल्पता॒ꣳ॒।

सुव॑र्दे॒वाꣳ अ॑गन्मा॒मृता॑ अभूम प्र॒जाप॑तेः प्र॒जा अ॑भूम

सम॒हं प्र॒जया॒ सं मया᳚ प्र॒जा सम॒हꣳ रा॒यस्पोषे॑ण॒ सं मया॑ रा॒यस्पोषः॑।

अन्ना॑य त्वा॒ऽन्नाद्या॑य त्वा॒ वाजा॑य त्वा वाजजि॒त्यायै᳚ त्वा॒।

अ॒मृत॑मसि॒ पुष्टि॑रसि प्र॒जन॑नमसि॥

[[1-7-10]]

अन्नहोमाः

[[1-7-10-1]]

वाज॑स्ये॒मं प्र॑स॒वः सु॑षुवे॒ अग्रे॒ सोम॒ꣳ॒ राजा॑न॒मोष॑धीष्व॒प्सु।

ता अ॒स्मभ्यं॒ मधु॑मतीर्भवन्तु व॒यꣳ रा॒ष्ट्रे जा᳚ग्रियाम पु॒रोहि॑ताः॥

वाज॑स्ये॒दं प्र॑स॒व आ ब॑भूवे॒मा च॒ विश्वा॒ भुव॑नानि स॒र्वतः॑।

स वि॒राजं॒ पर्यै॑ति प्रजा॒नन् प्र॒जां पुष्टिं॑ व॒र्धय॑मानो अ॒स्मे॥

वाज॑स्ये॒मां प्र॑स॒वः शि॑श्रिये॒ दिव॑मि॒मा च॒ विश्वा॒ भुव॑नानि स॒म्राट्।

अदि॑त्सन्तं दापयतु प्रजा॒नन् र॒यिं॥

[[1-7-10-2]]

च॒ नः॒ सर्व॑वीरां॒ नि य॑च्छतु॥

अग्ने॒ अच्छा॑ वदे॒ह नः॒ प्रति॑ नः सु॒मना॑ भव।

प्र णो॑ यच्छ भुवस्पते धन॒दा अ॑सि न॒स्त्वम्॥

प्र णो॑ यच्छत्वर्य॒मा प्र भगः॒ प्र बृह॒स्पतिः॑।

प्र दे॒वाः प्रोत सू॒नृता॒ प्र वाग्दे॒वी द॑दातु नः॥

अ॒र्य॒मणं॒ बृह॒स्पति॒मिन्द्रं॒ दाना॑य चोदय।

वाचं॒ विष्णु॒ꣳ॒ सर॑स्वतीꣳ सवि॒तार᳚म्॥

[[1-7-10-3]]

च॒ वा॒जिन᳚म्॥

सोम॒ꣳ॒ राजा॑नं॒ वरु॑णम॒ग्निम॒न्वार॑भामहे।

आ॒दि॒त्यान् विष्णु॒ꣳ॒ सूर्यं᳚ ब्र॒ह्माणं॑ च॒ बृह॒स्पति᳚म्।

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभि षिञ्चामीन्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामि॥
[[1-7-11]]
उज्जितीः॥सोमऋषिः।
[[1-7-11-1]]
अग्निरेकाक्षरेण वाचमुदजयत्।
अश्विनौ द्व्यक्षरेण प्राणापानवुदजयताम्।
विष्णुस्त्र्यक्षरेण त्रींल्लोकानुदजयत्
सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्
पूषा पञ्चाक्षरेण पङ्क्तिमुदजयत्।
धाता षडक्षरेण षडृतूनुदजयत्।
मरुतः सप्ताक्षरेण सप्तपदाꣳ शक्वरीमुदजयन्
बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्।
मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत्॥
[[1-7-11-2]]
वरुणो दशाक्षरेण विराजमुदजयत्।
इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्।
विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन्
वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयन्।
रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयन्न्।
आदित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयन्न्
अदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्
प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्॥
[[1-7-12]]
अतिग्राह्याः॥ सोमऋषिः।
[[1-7-12-1]]
उपयामगृहीतो ऽसि नृषदं त्वा द्रुषदं भुवनसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा।
उपयामगृहीतो ऽसि अप्सुषदं त्वा घृतसदं व्योमसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा।
उपयामगृहीतो ऽसि पृथिविषदं त्वाऽन्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा
ये ग्रहाः पञ्चजनीना येषां तिस्रः परमजाः। दैव्यः कोशः॥

[[1-7-12-2]]

समुब्जितः।

तेषां विशिप्रियाणामिषमूर्जꣳ समग्रभीमेष ते योनिरिन्द्राय त्वा।

अपाꣳ रसमुद्वयसꣳ सूर्यरश्मिꣳ समाभृतम्।

अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममेष ते योनिरिन्द्राय त्वा।

अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः।

स प्रत्युदैद्धरुणो मध्वो अग्रꣳ स्वायां यत्तनुवां तनूमैरयत।

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा॥

[[1-7-13]]

काम्ययाज्यापुरोऽनुवाक्याः॥ विश्वेदेवा ऋषयः॥

[[1-7-13-1]]

अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः।

अन्विन्द्रꣳ रोदसी वावशाने अन्वापो आजिहत जायमानम्॥

अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये।

अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये।

इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम्।

न ह्यस्या अपरं चन जरसा॥

[[1-7-13-2]]

मरते पतिः॥

नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते।

यस्येदमप्यꣳ हविः प्रियं देवेषु गच्छति॥

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्।

यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः॥

आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः।

पताति दिद्युन्नर्यस्य बाहुवोर्मा ते॥

[[1-7-13-3]]

मनो विष्वद्रियग्वि चारीत्॥

मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते।

नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः॥

आ तू भर माकिरेतत् परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम्।

इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व॥
[[1-7-13-4]]

प्र यन्धि॥

प्रदातारꣳ हवामह इन्द्रमा हविषा वयम्।

उभा हि हस्ता वसुना पृणस्वाऽऽ प्र यच्छ दक्षिणादोत सव्यात्॥

प्रदाता वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा।

अस्मिन् यज्ञे बर्हिष्या निषद्याथा भव यजमानाय शं योः॥

इन्द्रः सुत्रामा स्ववाꣳ अवोभिः सुमृडीको भवतु विश्ववेदाः।

बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य॥
[[1-7-13-5]]

पतयः स्याम॥

तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम।

स सुत्रामा स्ववाꣳ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु॥

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम॥

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत। अभीके चिदु लोककृत् सङ्गे समत्सु वृत्रहा।

अस्माकं बोधि चोदिता नभन्तामन्यकेषाम्। ज्याका अधि धन्वसु॥